# Shri Ganesha Stotram Shrishivakritam

# શ્રીશિવકૃતં શ્રીગણેશસ્તોત્રમ્

## Document Information

Text title : Shri Ganesha Stotram Shrishivakritam

File name : gaNeshastotramshrIshivakRRitaM.itx

Category : ganesha, mudgalapurANa, stotra

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM aShTamaH khaNDaH | adhyAyaH 12 | 8.12 22-33||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# શ્રીશિવકૃતં શ્રીગણેશસ્તોત્રમ્

॥ શ્રીગણેશાય નમઃ ॥
શ્રીશિવ ઉવાચ ।
ગણેશાય પરેશાય ધૂમ્રવર્ણાય ઢુણ્ઢયે ।
શિવાત્મજાય સર્વેષાં માત્રે પિત્રે નમો નમઃ ॥ ૨૨॥
ગણેશાય ગુણાનાં તે સ્રષ્ટ્રે પાત્રે મહાત્મને ।
સંહર્ત્રે દેવદેવાય હેરમ્બાય નમો નમઃ ॥ ૨૩॥
અનન્તવિભવાયૈવાનન્તમાયાપ્રચાલક ।
અનન્તોદરગાયૈવ વિઘ્નેશાય નમો નમઃ ॥ ૨૪॥
જ્યેષ્ઠરાજાય જ્યેષ્ઠાય જ્યેષ્ઠાનાં જ્યેષ્ઠરૂપિણે ।
સર્વપૂજ્યાય તે સર્વાદિપૂજ્યાય નમો નમઃ ॥ ૨૫॥
સ્વાનન્દપતયે તુભ્યં મૂષકધ્વજધારિણે ।
સિદ્ધિબુદ્ધિપતે નાથેક્ષુસાગરપતે નમઃ ॥ ૨૬॥
મનોવાણીવિહીનાય મનોવાણીમયાય તે ।
યોગેશાય મહાવિષ્ણુસુતાય તે નમો નમઃ ॥ ૨૭॥
શેષપુત્રાય ત્રૈલોક્યક્ષેત્રસ્થાય નમો નમઃ ।
દણ્ડકારણ્યદેવાય બ્રહ્મેશાય નમો નમઃ ॥ ૨૮॥
યત્ર વેદાદયો નાથ યોગિનઃ શાન્તિમાયયુઃ ।
તં પશ્યામિ ગણાધીશં ધન્યોઽહં સર્વભાવતઃ ॥ ૨૯॥
નેત્રાણિ ધન્યરૂપાણિ પ્રભો ત્વત્ દર્શનેન મે ।
મસ્તકાનિ નમસ્કારાત્ સ્તવનાન્ મે મુખાનિ તે ॥ ૩૦॥
હસ્તાઃ પૂજનતસ્તે મે ધન્યાઃ સર્વં મદીયકમ્ ।
ધન્યં તે પાદપદ્મસ્ય દર્શનેન ગજાનન ॥ ૩૧॥
ભક્તિં દેહિ ત્વદીયાં મે તયાઽહં ગણનાયક ।
કૃતકૃત્યો ભવિષ્યામિ શાન્તિયોગપરાયણઃ ॥ ૩૨॥
ત્રિપુરસ્ય વધાર્થાય સામર્થ્યં દેહિ શાશ્વતમ્ ।

મહેશ ત્વં ગણાધીશ સાર્થકં કુરુ નિત્યદા ॥ ૩૩॥

ઇતિ શ્રીશિવકૃતં શ્રીગણેશસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ મુદ્ગલપુરાણં અષ્ટમઃ ખણ્ડઃ । અધ્યાયઃ ૧૨ । ૮.૧૨ ૨૨-૩૩॥

- .. mudgalapurANaM aShTamaH khaNDaH . adhyAyaH 12 . 8.12 22-33..

Proofread by Yash Khasbage, Preeti Bhandare

---

*Shri Ganesha Stotram Shrishivakritam*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*